# ग्राम्यजीवनम्

ग्राम्यजीवनं सुव्यवस्थितं भवति। ग्रामे प्रायेण सर्वे स्वस्थाः भवन्ति। वनेषु नगरेषु च तथा जीवनं न भवति, वस्तुतः ग्रामाः वननगरयोः मध्ये सन्ति। ग्रामीणाः प्रायेण कृषीवलाः भवन्ति। ते च प्रातःकालात् सायं यावत् क्षेत्रेषु कर्म कुर्वन्ति। क्षेत्राणि परितः वारिणा–पूर्णाः कुल्याः भवन्ति। कृषकाः क्षेत्राणि हलेन कर्षन्ति। कुल्याजलेन तानि सिञ्चन्ति, तत्र बीजानि वपन्ति च।



ग्रामान् परितः शस्यश्यामला धरित्री राजते। परिश्रमशीलाः ग्रामीणाः धान्यादिकम् उत्पादयन्ति। वैज्ञानिकोपकरणानां साहाय्येन इदानीं कृषिव्यवसायः लाभप्रदः सञ्जातः।

ग्रामपथिकानां गोपालानां च सङ्गीतेन हृदयः प्रसन्नः भवति। वृक्षाः निःस्वार्थमेव फलं छायां च प्रयच्छन्ति। ग्रामे शुक–हंस–मयूर–कोकिलादयः पक्षिणः कूजन्ति। हरिण–गो–महिष–मेषादयः पशवः च चरन्ति। ग्रामेषु मनोरञ्जनम् अल्पव्ययसाध्यं भवति। धूलिधूसरिताः बालकाः क्रीडां कुर्वन्ति! जीवनरक्षार्थम् अत्यन्तोपयोगीनि वायुजलादीनि ग्रामेषु प्रचुराणि यथालभ्यन्ते तथा न नगरेषु।

ग्राम्यजीवनं सदाचारसम्पन्नं धार्मिकं च भवति ग्रामवासिनां मनांसि निर्मलानि भवन्ति। तत्रत्यं वातावरणं स्वच्छं भवति। प्राचीनकाले ग्रामेषु तथाविधशिक्षालयचिकित्सालयादीनां सौविध्यं नासीत् यथा अद्यास्ति। तथापि अधुना ग्रामेषु सफलानि साधनानि यदि उपलब्धानि भवेयुः तर्हि ग्राम्य–जीवनम् इतोऽपि सुकरं सुखकरं च भविष्यति। तदर्थं ग्राम–निवासिभिः सम्भूय प्रयत्नः विधेयः।

## शब्दार्थाः

कृषीवलाः = किसान। क्षेत्रेषु = खेतों में। वारिणा = जल से। कुल्याः = नालियाँ। कर्षन्ति = जोतते हैं। वपन्ति = बोते हैं। परितः = चारों ओर। प्रयच्छन्ति = देते हैं। सौविध्यम् = सुविधा। शस्यश्यामला = फसलों से हरित। कूजन्ति = कूजते हैं। सम्भूय = एक होकर। सुकरम् = सरल।

## अभ्यासप्रश्नाः

(1) निम्नांकित प्रश्नों के उत्तर संस्कृत में लिखिए–

(क) ग्राम्यजीवनं कथं भवति ?
(ख) ग्रामे प्रायेण जनाः कीदृशाः भवन्ति ?
(ग) क्षेत्रेषु जनाः कदा कार्यं कुर्वन्ति ?
(घ) कुल्यया परिवेष्टितानि कानि सन्ति ?
(ङ) इदानीं कृषिव्यवसायः कीदृशः अस्ति?
(च) हृदयः केन प्रसन्नः भवति ?
(छ) धूलिधूसरिताः विविधाः क्रीडाः के कुर्वन्ति ?
(ज) ग्राम्यजीवनं सुखकरं कथं भवेत् ?

(2) कोष्टक में दिए गए उचित क्रियापदों से रिक्त स्थानों की पूर्ति कीजिए –

(क) पक्षिणः ................ । (कूजन्ति/कूजति)
(ख) ग्रामीणाः हलानि ..............। (कर्षतः/कर्षन्ति
(ग) मनांसि निर्मलानि ..............। (भवति/भवन्ति)
(घ) सकलानि साधनानि ............। (भवेत्/भवेयुः)
(ङ) ग्राम्यजीवनं सुखकरं ...........। (अभवत्/भविष्यति)
(च) ग्रामे सौविध्यं ......................। (अस्ति/सन्ति)
(छ) वातावरणं स्वच्छं .................। (स्यात्/स्युः)

(3) निम्नांकित वाक्यों का संस्कृत में अनुवाद कीजिए–

(क) गाँव कृषि प्रधान होता है।
(ख) किसान खेतों में काम करता है।
(ग) किसान अन्न उगाता है।
(घ) गाँवों में मनोरञ्जन भी सुलभ है।
(ङ) भारत गाँवों का देश है।

QBS6GX

(4) निम्न पदों का समास विग्रह कीजिए–

(1) कुल्याजलेन (2) शस्यश्यामला (3) ग्राम्यजीवनम्
(4) कृषिव्यवसायः (5) शिक्षालयः (6) अल्पव्ययसाध्यम्।

(5) "ग्राम्यजीवनम्" नामक पाठ के अन्तर्गत आए सन्धियुक्त शब्दों का विच्छेद कर नाम लिखिए। (कम से कम पाँच)।

(6) "कृषीवलः" अकारान्त पुल्लिङ्ग शब्द का रूप (कारक रचना तीनों वचनों और सभी विभक्तियों में लिखिए–